हरिदास संस्कृत ग्रन्थमाला ३०६

श्रीसामराजदीक्षितप्रणीतम्

धूर्त्तनर्तनकम्

[प्रहसनम्]

सम्पादकः

श्री बाबूलाल शुक्ल शास्त्री

चौखम्बा संस्कृत सीरीज आफिस . वाराणसी - १

॥ श्रीः ॥

हरिदास संस्कृत ग्रन्थमाला
३०६

****

श्रीसामराजदीक्षितप्रणीतम्

धूर्त्तनर्तनकम्

[प्रहसनम्]

तच्च भूमिका-पद्यानुक्रमणिकादिभिः
संस्कृत्य सम्पादितम्

सम्पादकः
प्राध्या० बाबूलाल शुक्ल शास्त्री
एम० ए०, साहित्याचार्यः
मध्य प्रदेश सरकार (साहित्य अकादमी) द्वारा सम्मानित,
प्राध्या० एवं विभागाध्यक्ष : गवर्नमेन्ट गर्ल्स पोस्ट-ग्रेजुएट कॉलेज,
उज्जैन (म० प्र०)

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१
१९८९

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

मुद्रक : चौखम्बा प्रेस, वाराणसी

संस्करण : प्रथम, वि० सं० २०४६

मूल्य : C. S. S. OFFICE Rs. 15/-

के० ३७/९९, गोपाल मन्दिर लेन

पो० बा० १००८, वाराणसी-२२१००१ (भारत)

फोन : ६३१४५

प्रधान वितरक

कृष्णदास अकादमी

पो० बा० नं० १११८

चौक, (चित्रा सिनेमा बिल्डिंग), वाराणसी-२२१००१

(भारत)

HARIDAS SANSKRIT SERIES
306
****

DHŪRTA NARTANAKA

[PRAHASANA]

OF

SAMARAJ DIKSHITA

Edited with the
Introduction, Various readings & Index.

By
Prof. Babulal Shukla Shastri
M. A., Sahityacharya.
Honoured by the M. P. Govt. (Sahitya Academy)
Prof. & Head : Govt. Girls Post-Graduate College, Ujjain (M.P.)

CHOWKHAMBA SANSKRIT SERIES OFFICE, VARANASI.
1989

K. 37/99, Gopal Mandir Lane

Post Box 1008, Varanasi-221001 (India)

Phone : 63145

First Edition

1989

Price [redacted]

Also can be had from

KRISHNADAS ACADEMY

Oriental Publishers & Distributors

POST BOX No. 1118

Chowk, (Chitra Cinema Building), Varanasi-221001

(INDIA)

INTRODUCTION

It is a great pleasure for me to present the valuable work of Sāmarāj Dīkshit named DHOORTANARTANAKAM PRAHASANAM. When I edited Kavyendu Prakash a work of Kāmarāja Dikshit, I began to think over to edit the dramatic works of Sāmarāj Dīkshit. Because Kāmarāja Dīkshit referred the two dramatic works of Samaraj Dikshit and he quoted them many times. Samaraja Dīkshit was the father of Kamaraj Dikshit and he was a great scholaṛ of Sanskrit. So he is still have his own seat in the galaxy of Sanskrit scholars.

I used four MSS. to edit the 'Dhoortanartanakam, Prahasanam. The details are as below—

1. The MS. of Scindia Oriental Institute, Ujjain No. 9552, size 10 x 4½ and folios 17. It contains two sandhis completely. According to its Pushpika it was written in 1645 Shaka year. It's indication is 'A'.

2. The Ms. of Asiatic Society, Bengal, Calcutta No. 5272, size 11 x 5½ and folios are 12 only. This MS. is incomplete and contains First and the beginning of second Sandhi. It's indication is 'B'.

3. The two MSS. of Saraswati Bhavan Library situated in Varanaseya Sanskrit Vishwavidyalaya, Varanasi Nos. are 4020 and 4016 respectively. These MSS. are used to correct the text.

4. In addition to these MSS. I have a MS. in my own

collection also. It's folios are 16 and size 10 x 5. Near about it is perhaps a complete work. These all MSS. are written in Devanāgari character. For the present edition I based the MSS. A of Scindia Oriental Institute, Ujjain as well as the MS. of my own collection. Rest of the MSS. are kept according to 'B' because they resemble to the text of the copy of 'B'.

Samaraj Dikshit-The Author.

Sāmarāj Dikshit was the son of Narahari Dikshit who was patronised by the king of Bundelkhand. One branch of his descendant was in Kashi and their surname was Bindu-Purandare. At present the 'Bandhavakar' surname holders are known as the descendants of the same family. The descendants of Shri Sāmarāj Dikshit of Mathura informed that their habitation was near the birth place of Lord Krishna and were foremost in the worshippers af SHRĪVIDYA. Sāmarāj Dikshit had a son named Kāmarāj Dikshit who wrote Kavyendu-Prakash. Shri Samarāj Dikshit wrote eight works. In order these are as below—

(1) DHOORTANARTANAKAM (Farce), (2) Shree Dāma Charitam (Drama), (3) Aksharagumphah, (4) Aryā-Trishatee. (5) Shringaraamrita-laharee, (6) Tripurasundaree-Stotram, (7) Tripurasundaree Manasapuja Stotram and (8) Poojaratnam.

The famous drama of Sāmarāj Dikshit Shridāma Charitam was written in 1681, therefore, we can undoubtedly say that his time was in the second half of the 17th century. In the order of works, we are publishing Shreedāmacharit in the next issue. In this regard we will put the detailed discussions there.

DHOORTANARTANAKAM PRAHASANAM

'Prahasana' is one type of Dasharoopaka (Ten types of drama) mainly based on comic. It has two Sandhis and sixteen characters. The main Rasa (Sentiment) of the drama is Hasya and the present writer maintained this skilfully than his previous writers. He had a full command on language and he made a good use of it. The Hasya has not touched Valgarity (Ashleelata) and the development of characters naturally described.

ACKNOWLEDGEMENTS.

First of all my heart-felt gratitudes to those research-centres who provided me the valuable manuscripts. I am thankful to the officials and scholars of Royal Asiatic Society, Calcutta, Scindia Research Institute, Ujjain and Saraswati Bhavan Library of Varanaseya Sanskrit Vishwavidyalaya, Varanasi. I submitted the copy for publication in the year 1979-80 to the publisher but it could not be published at that time. I am grateful to the proprietor of Chowkhamba Sanskrit Series of Varanasi Shribhai Vitthaldasji Gupta, who published both the books of Sāmaraj Dikshit through his valuable publication Series and shown a graceful attitude and enriched the dignity of Sanskrit literature. I am also grateful to Dr. Rudradeva Tripathi, editor and Research Officer of Birla Shodha Kendra, Ujjain, Dr. Ramesh Purohit of Scindia Research Institute, Ujjain and to dearest friend Dr. Laxminarayan Shukla of Sanskrit College, Indore and Dr. Jagdish Sharma of Kalidasa Akademi, Ujjain.

—Baboolal Shukla Shastri

प्रस्तावना

श्रीसामराज-दीक्षित-प्रणीतं 'धूर्त्तनर्तनकं' नामप्रहसनस्येदं संस्करणं विद्वत्तल्लजानां करकमलेषु समुपस्थापयतः परमं प्रमोदमनुभवति मे चेतः। संस्करणमिदं मातृकाचतुष्टयसाहाय्येन संशोद्धय सम्पादितम्। सम्पादनविवरणञ्चाङ्ग्लभाषा–प्रस्तावनायां पल्लवितमेवेति नेह लिख्यते पुनः।

एतस्य प्रहसनस्य रचयिता श्रीसामराजदीक्षितः बिन्दुपुरन्दरे कुलजन्मा श्रीनरहरिदीक्षितस्य सूनुरासीत्। स्वपाण्डित्यप्रतिभया भगवत्यास्त्रिपुरसुन्दरीसमाराधनेन चायं दीक्षितः सामराजः बुन्देलखण्डीयस्यानन्दरायमहीपतेः सभापण्डितः समभूदिति। आनन्दरायनृपतेर्दानौदार्याभ्यामेव श्रीदीक्षितस्तदुत्तरकालिकाः अस्य वंशजाः नृपसमर्पितायाः भूमेः स्वामित्वमधारयन्। अयं सामराजदीक्षितः सोत्तरे वयसि मथुरायामुवास इति प्रकटयन्ति एतद्वंश्याः माथुराः पण्डिताश्च। एतस्यैव महाविदुषो विमले वंशेऽस्यात्मजः श्री कामराजदीक्षितः जनिर्लेभे येन 'काव्येन्दुप्रकाशः[1], रसनिर्णयः, चम्पकमञ्जरीनाटिका, नरहरिविजय-नाटकम्, शृङ्गारकलिकाप्रभृतिग्रन्थानां रचना सुविहिता।

श्रीदामचरितनाटकस्य १६८९ खिस्ताब्दे प्रणीतत्वात् एतस्यैव नाटकस्य प्रस्तावनायां धूर्तनर्तकस्याप्युल्लेखात् श्रीसामराजदीक्षितस्य स्थितिकालः सप्तदशशताब्द्याः अन्तिमे भागेऽभविष्यदिति निश्चीयते ऐतिह्यविदैः। स एव च आनन्दरायनृपतेरपि स्थितिकालः आसीत्।

श्रीसामराजदीक्षितप्रणीतेषु ग्रन्थेषु "धूर्तनर्तनकम्-प्रहसनम्, श्रीदामचरितं नाटकम्, अक्षरगुम्फः, त्रिपुरसुन्दरीस्तोत्रम्, त्रिपुरसुन्दरीमानसपूजास्तोत्रम्, आर्यात्रिशती, शृङ्गारामृतलहरी, पूजारत्नमि"ति अष्टौ रचनाः सन्ति। तदिदं फलं भगवत्याः उपसनायाः एवेति निर्विवादम्।

---

१. काव्येन्दुप्रकाशस्य सम्पादनं मयैव विधाय चौखम्बा संस्कृतग्रन्थमालायां १९६६ वर्षे प्रकाशनं व्यधायि।

धूर्तनर्तनकम्–प्रहसनम्

नाट्यशास्त्राचार्येण भरतेन दशरूपकेषु प्रहसनमेकः प्रकारः समाम्नातः। तदनुसारं प्रहसनस्य विषयः केवलं हास्यमेव। एतस्य कथावस्तु कविकल्पितं नायकश्च धूर्तप्रायो भवति। अङ्गीरसश्चास्य हास्यः तथा चात्र भाणवदेव सन्धिसन्ध्यङ्गहास्याङ्गानां विनियोजना यथासम्भवं योज्यतेऽत्र, परं विष्कम्भक-प्रवेशकौ विनियोज्यौ न भवतः, वृत्तिश्चारभट्टी योज्या स्यात्। एतस्य शुद्ध-सङ्कीर्ण-विकृतात्मकरूपेण भेदत्रयमाचार्याः मन्यन्ते। अपरे शुद्धसङ्कीर्णं भेद-द्वयमेव स्वीकुर्वन्ति। तत्र परिव्राट्तापसद्विजैरन्यैरपि हास्यकुशलैरारब्धं शुद्धं वेश्याविटनपुंसकादिपात्राणां योजनया सङ्कीर्णं भवति। अस्य द्वावङ्कौ मुखनिर्वहण-सन्धी च भवतः। विकृताख्ये तृतीये च प्रभेदे शुद्धसङ्कीर्णभेदयोः मिश्रणं क्रियते आचार्यैः। प्रहसने प्रायः एतादृशशिष्टानां चित्रणं प्रस्तूयते ये धर्मकर्मणोर्व्याजेन छद्मवेषाः सन्तः निन्द्यप्रवृत्तिमुररीकुर्वन्ति। प्रयोजनमपि अस्येदमेव यत् प्रचलितानाडम्बरसहितान् पाखण्डांश्च प्रदर्श्य तेषामुपरि व्यङ्ग्य-क्रियया समाजतो दोषापाकरण-प्रयासः। प्रहसनस्य निर्माणे श्रीसामराजदीक्षितेनापि मनसी-दमेव प्रयोजनं निधायैवास्य रचना विहितेति स्पष्टमेव प्रतिभावतां विदुषाम्।

नाट्यशास्त्रीयानि लक्षणान्यनुसृत्य अस्यापि प्रहसनस्य द्वे सन्धी अङ्करूपेण विन्यस्तौ। एतस्य पात्राणि मूढेश्वरः, जगद्वञ्चकः, मुखरः, ब्रह्मानन्दस्वामी, पापः शुण्ठाचार्यः, राजा पापचारः, निर्मेधाश्रयः, मङ्गलकुठारमिश्रादीनि सम्भूय षोडशसंख्याकानि सन्ति। एतैः पात्रैः स्वीयं नाट्यकौशलं कवित्वनैपुण्यं च श्रीदीक्षितेन समानमेव प्रकटीकृतमिति सुधीभिर्ज्ञेयम्। एवं यद्यपि कृतिरियं दीक्षितस्य प्राथमिकी तनीयसी चापि कवेः सार्वत्रिकं वैदुष्यं समुद्भावने सम-र्थेति सुदृढं वक्तुं शक्यते। अनेन स्वकीयनाट्यकाव्यादिवैशिष्ट्येन च कवि-नाऽनेन साफल्यमधार्यतेति चाथ प्राक्तनप्रहसनादिनाट्यरचनापंक्तिषु स्वस्याति-विशिष्टं स्थानञ्च समासादितमिति सुस्पष्टमेव भवेत्। एतस्य प्रकाशने यत्र मुद्रादिदोषजन्याः मात्रादित्रुटिदोषाः वा केचन भवेयुस्तान् विद्वांसः पाठकाः स्वयमेव संशोध्य लाभान्विताः भवेयुरस्य कृतेरास्वादनेन च मयि प्रसीदन्त्विति।

आभारः

धूर्तनर्तकस्य बहोः कालात् प्रागेव मया सम्पाद्य प्रकाशनाय चौखम्बा-संस्कृतग्रन्थमालायां एका प्रतिः प्रेषिताऽऽसीत् परन्तु कालक्रमेण तदिदानीं प्रकाश्य विदुषामग्रे स्थाप्यतेऽनुशीलनायेति सन्तोषमनुभवामि। एतस्य सम्पादने आधारभूतहस्तलिखितप्रतीनां समासादने कृतसहाय्यानां हस्तलिखितग्रन्था-गाराधिकृतानां समधिकोपकारभारं साभिनन्दनं संस्मरामि। चौखम्बासंस्कृत-ग्रन्थमालाधिकृतानां सुहृद्वराणां श्रीविठ्ठलदासगुप्तमहाभागानां प्रकाशने तथा श्रीमतां डॉ० रुद्रदेव त्रिपाठी, विडलाशोधसंस्थानोज्जयिनीस्थानेऽनु-सन्धानादिकर्मणि निरतानां पण्डितप्रवराणां तथा कालिदास अकादम्याः डॉ० जगदीशशर्मणामपि एतस्मिन् कर्मणि कृतं साहाय्यमनुस्मरन् धन्यवादैः सर्वांश्चा-भिनन्दन् विरमाम्यनल्पजल्पनादिति।

उज्जयिनी
वसन्तपञ्चमी, वि. सं. २०४५

विदुषां वशंवदः
बाबूलाल शुक्ल शास्त्री

पात्र-परिचयः

१ सूत्रधारः	—प्रहसन-प्रवर्तकः प्रधाननटः।
२ नटी	—सूत्रधारभार्या।
३ मूढेश्वरः	—गुरुः वृद्धनायकः।
४ जगद्वञ्चकः	—मूढेश्वरस्य प्रथमः शिष्यः।
५ मुखरः	—मूढेश्वरस्य द्वितीयः शिष्यः।
६ ब्रह्मानन्दस्वामी	—मूढेश्वरस्य सुहृद्।
७ पापः	—ब्रह्मानन्दस्वामिशिष्यः।
८ शुण्ठाचार्यः	—मूढेश्वरस्यापरः सुहृद्।
९ वसन्तलतिका	—पुराङ्गना मूढेश्वरस्य प्रेयसी।
१० पापचारो नृपः	—शासकः।
११ विदूषकः	—पापचारस्य नर्मसचिवः।
१२ प्रतिहारः	—द्वास्थः राजसेवकः।
१३ पुरुषः	—राजकीयसेवकः।
१४ निर्मेधाचार्यः	—मूढेश्वरस्योपाध्यायः।
१५ मङ्गलकुठारमिश्रः	—शुण्ठाचार्यस्य शिष्यः।
१६ वैतालिकः	—मागधः।

दीक्षित-सामराजप्रणीतं

धूर्त्तनर्तनकम्

[प्रहसनम्]

अथ प्रथमः सन्धिः

नान्दी।

क्रीडन्नारीकदम्बे कलयति जगतामीश्वरे कंसशत्रौ
मिथ्यावैराग्यदम्भं निखिलवरवधूदत्ततालं तथोच्चैः।
हास्यं चक्रे कदाचिन्मधुभिदभिमतं पीतवस्त्रे चकर्षं
जाते त्वित्थं मुरारिः स्मितसुभगमुखः पातु युष्मान् स तस्मात्॥१॥

अपि च—

कालिन्दी पुलिने तमालमलिने भृङ्गैर्विहङ्गैर्युते
क्रीडत्कोकिलपोतराजि[1]विलसत्कण्ठे मनोहारिणि।
अर्धग्रस्तशशाङ्कबिम्बजमुखे राधाधरं धारयन्
गोपीभिः परिवेष्टितो भवतु वो भव्याय नव्याकृतिः॥२॥

(नान्द्यन्ते)

सूत्रधारः—(सर्वतोऽवलोक्य[2]) अहो अद्य तावत् वृन्दारुवृन्दारक-वृन्दमौलिस्खलन्मन्दमन्दारप्रसवमकरन्दसन्दोहामोदितपादकुसुमस्याति-विकटसटाकोटिकोटिपाटित नीरधरोदरस्खलन्नीरपीवरितावनीरुहप्रसव-विभूषितोत्तमाङ्गस्यातिखरनखरसरदा[3]वेश - विदारितदर्पोद्दीर्णहिरण्य-कशिपूदरदरीजरीजृम्भमाणान्त्रसन्तानशोभितङ्गस्य दैत्याकरिकेसरिणो नरकेसरिणो यात्रायां परिमीलितेन निखिलकलाकोविदेन धरित्रीसुत्राम्णां समूहेनाहमुक्तः यद्दीक्षितनरहरिकुलावतंसेन तर्ककर्कशजलधिकुम्भ-

---

१. पोतराज—ब.। २. विलोक्य—ब.। ३. सरदावे विदा—ब.।

कूलोत्तंसेन सरससाहित्यसुधासरोहंसेन सकलकलाभिज्ञेन दीक्षितसामराजाभिधेन विरचितं धूर्त्तनर्तनकं नामापूर्वं प्रहसनं तन्नाट्यतामिति। तद्यावदहमस्याश्चित्तानन्दाय भवनमुपसृत्य भामिनीमाहूय सह कुशीलवैस्सङ्गीतकमनुतिष्ठे।

(इति नेपथ्याभिमुखमवलोक्य) इदमस्मद्भवनद्वारम् । यावत् प्रविशामि । (प्रविश्योच्चैः) भामिनीतस्तावत् ।

नटी—(प्रविश्य) अज्ज को णिओओ अणुचिट्ठीअदु त्ति आणवेदु अज्जो ।

[आर्य, को नियोगोऽनुष्ठीयतामित्याज्ञापयत्वार्यः]

सूत्रधारः—आर्ये, हास्यरसभूयिष्ठेन रूपकेण तोषणीयेयं विदुषां परिषत् ।

नटी—अज्जउत्त, कीरिसं ता रूवअं । को उण तस्स कइ ?

[आर्यपुत्र, कीदृशं तद्रूपकम् । कः पुनस्तस्य कविः ?]

सूत्रधारः—आर्ये, अस्मिन् विषयेऽप्यनभिज्ञासि । पश्य—

तन्वते निर्वृतिं यस्य वाचो लोकस्य कर्णयोः ।
रतिप्रमत्तवनिताकङ्कणक्वाणमञ्जुलाः ॥ ३ ॥

अपि च—

नरहरिकुलाब्धिचन्द्रो नरहरिमान्यो हि सामराजो यः ।
नरहरिवन्द्यतनुश्रीर्नरहरिचन्द्राब्जरोलम्बः ॥ ४ ॥

तेन कविना विरचय्य मय्यनुनयेन धूर्त्तनर्तकं नाम प्रहसनं प्रत्यर्पितम् ।

नटी—ता कं उण उदुं अहिकरिअ गाइस्सं !

[तत् कं पुनः ऋतुमधिकृत्य गायिष्ये ?]

सूत्रधारः—कान्ते, अमुमेवाचिरप्रवृत्तमभिनवचूतमञ्जरीरेणुपिञ्जरीकृतेन्दिन्दिरसुन्दरीनिकरविरावापूरिताशाविसरमत्तकलकण्ठकलापकलकलपूरितदिगन्तरालं सुरभिसमयमभिगीयताम् ।

इह हि—

सुरतचतुरनारी स्वेदनीरापहारी
जनगणसुखकारी पान्थवर्गापकारी ।
जलधितटविहारी[1] चन्दनामोदहारी
वहति विरहिमारी[2] मारुतः पद्मसारी ॥ ५ ॥

नटी—(गायति) ।

माणिणीमाणविलुंपअ णच्चिद चूअअचंपअओ ।
लाड[3] वहूअकटच्छअअं विरहिवहू अण[4] तावणओ ॥ ६ ॥

[मानिनीमानविलुम्पक नर्तितचूतचम्पककः ।
लाटवधूककटाक्षनवं विरहिवधूजनतापनकः ॥]

रइवइणं रवइ जेत्तरओ वाअइ चंदणगंधवओ ।

[रतिवचनं रौति जैत्ररवः वाति चन्दनगन्धवहः ॥]

सूत्रधारः—एतत्ते गीतमाकर्ण्य चित्रितेवाखिला सभा ।
विभाति खलु निश्चेष्टा जिह्वाय[5] न्त्रणमञ्जुला ॥७॥

(नेपथ्ये)

वामाराधनतत्परकरणः शिष्यसुपूजितमञ्जुलचरणः ।
करकलितासममस्करदण्डः पण्डितमण्डननागरतुण्डः ॥ ८ ॥

नटी—अज्जउत्त, को एसो रुद्दक्खलक्खभूसिदसिरोदेसपेसलवेसो फडिअ भूसिद जडाकण्णकंठकुप्परो रक्खोवलक्खिदगत्तणिअरो णच्चदो विअ इदो ज्जेव्व आअच्छदि ।

[आर्यपुत्र, क एष रुद्राक्षलक्ष्यभूषितशिरोदेशपेशलवेषः स्फटिकभूषितजटाकर्णकण्ठकूर्परः रक्षोपलक्षितगात्रनिकरः नृत्यन्निवेत एवागच्छति ।]

सूत्रधारः—(विलोक्य)

---

१. निहारी–ब. । २. नारी–ब. । ३. ताडवहूअअणच्चणओ–ब. । ४. तोवणओ–ब. । ५. यन्त्रेण–ब. ।

कषायप्रावारोल्लसदतुलभस्माकुलवपु
स्त्रिपुण्ड्राक्षाभ्यां यः कलयति गिरीषस्य सुषमाम् ।
जटाधारी [1]मानानुसरणपरीरब्धहृदयो-
दयो रक्षागोलं कलयति च कक्षापुटतटे ॥ ९ ॥

(विभाव्य) आः ज्ञातम्—

वाराङ्गनाभोगविलासनागरः समातुलानीरससारसागरः ।
वामोल्लसत्पादसरोजषट्पदस्स एष मूढेश्वर एत्यलम्मदः ॥१०॥

तदेतस्य पापस्य दर्शनमपि दूरत एव परिहरणीयम् । (इति निष्क्रान्तौ)

प्रस्तावना ।

(ततः प्रविशति शिष्याभ्यां सह यथानिर्दिष्टो मूढेश्वरः)

मूढेश्वरः—(पुरतोऽवलोक्य)

चिन्तयन्ति हि सदा मुदा हृदा
यं वदान्यमिति योगिनो धियः ।
शङ्करं सकललोकशङ्करं
चेतसा समभिभावयामहे ॥ ११ ॥

अपि च—

हृदयस्थापित[2]विनयं वीक्ष्येर्ष्यासङ्कुला शिवं[3] गौरी ।
कुरविन्दा[4]यितनेत्रा मन्थरगात्रा चिरं पातु ॥ १२ ॥

जगद्वञ्चकः—भोः गुरुदेव, मुनिजनस्याधीरत्वगर्वमवधीरयति निखिलकुसुमपरागसुरभिः सुरभिः । यश्च—

पिकावलीकूजितपूरिताशो वियोगिसन्देहितजीविताशः ।
वसन्तवल्लीमकरन्दबिन्दुसन्दोहसन्तोषितषट्पदौघः ॥१३॥

मूढेश्वरः—वत्स जगद्वञ्चक, वसन्तवल्लीत्यनेन तद्बोधितम् (इत्यर्द्धोक्त्या आत्मगतम्) बर्बरौ खलु बटू तदिदं नाभिधास्ये ।

मुखरः—भो गुरुदेअ तं उण किं ? [भो गुरुदेव तत्पुनः किम् ?]

१. नामानु—ब. । २. विजयं—ब. । ३. शिवा—ब. । ४. विन्दायतने-ब. ।

जगद्रक्षकः—वसन्तवल्या किमनुबोधितम् ?

मूढेश्वरः—वत्सौ शृणुत । यदि युवां तरलतरवीचिनिचयोद्धत-शीकरशीतलिततटस्य जलधेर्जलमादाय शपथं कुरुतं तर्ह्यभिधास्ये ।

उभौ—ओम् । (इति परिक्रामन्ति)

मूढेश्वरः—वत्स, जगद्रक्षक, पश्य । अनेनैव पथा दाशरथिः नवजलधराभिरामो रामो··· ···ससारनिखिलजगद्विद्रावणरावणान्त-करणाय (पुरतोऽवलोक्य) वत्सौ, सैवेयं लङ्काऽलङ्कारो भूवलयस्य । यस्याञ्च—

निजमुखजितचन्द्रस्सायकैः रामचन्द्रः
स्वभुजजबललोकद्रावणं रावणं तम् ।
महिषगमनहर्म्यं [1]यापयामास शश्वत्
तदनुजमनुचक्रे राक्षसानामधीशम् ॥ १४ ॥

(किञ्चिद् गत्वा विलोक्य च) वत्सौ, इतस्तु सन्निहित एव इति जानीमहे । यतः—

चन्दनामोदसन्दोह-वाहिको हि सदागतिः ।
याति मन्दगतिः सर्पवधूकवलनादिव ॥ १५ ॥

(अग्रतो विलोक्य) अये भगवतो महर्षेर्वातापितापनस्याश्रमः । अयं हि—

पटुतरबटुचाटूद्घोषणानां विरावै-
श्चपलचटकचञ्चच्चञ्चरीकानुशब्दैः ।
तरुशिखरनिषक्तैर्वल्कलैरार्द्रगात्रै-
रनुहरति मनो मे शाखिनां पुष्पवृन्दैः ॥ १६ ॥

(पार्श्वतोऽवलोक्य) स एष जलधिरुद्दामवीचिवाचालवेलः । तदेहि शपथकरणाय । (इति सर्वे परिक्रामन्ति)

---

१. प्रापयामास—ब. ।

मुखरः—(अपवार्य जगद्वञ्चकं प्रति) भो जेट्ठ पेक्ख पेक्ख । एसो अम्हाणं गुरुदेओ मीलंतलोअणजुअलो किं पि किं पि आलवंदो साअरतडं अदिक्कमेदि । ता क्खु णं किं वि भासेम्ह । [भो ज्येष्ठ, पश्य पश्य । एषोऽस्माकं गुरुदेवः मीलितलोचनयुगलः किमपि किमप्यालपन् सागरतटमतिक्राम्यति । तत् खलु एनं किमपि भाषयिष्यावः ।]

जगद्वञ्चकः—एष स्मेराननमाकरामि (मूढेश्वरं प्रति) ज्वरजर्जरा मे शरीरयष्टिः । तत् किं करोमि ।

मूढेश्वरः—(आत्मगतम्) चेष्टते खल्वेषः । (प्रकाशम्) वत्स, इदं गृहाण । (इति कक्षात उभयोर्हस्ते ददाति)

(जगद्वञ्चकः हस्ते गृहीत्वा विलोक्य विहस्य च मुखे निक्षिपति)

मुखरः—भो गुरुदेअ, किं किं एदं नीललोहिदकंठचुण्णसरिच्छं । ण दाव भक्खिस्सं । [भो गुरुदेव, किं किमिदं नीललोहितकण्ठचूर्णसदृशम् । न तावत् भक्षिष्यामि ।]

मूढेश्वरः—नाशनं खलु शोकानां शक्रासनमिदं परम् ।
गदकूटहरं पश्य नेत्ररागानुकारणम् ॥ १७ ॥

पीयूषं जन्मभेदी[1] शमनपदतुलस्वादुगीर्वाणलोके
तद्बिन्दुक्षोणिपृष्ठे न्यपदभिमतः पन्नगानां गणस्य ।
तस्माच्छक्रासनं कि समजनि जनता सर्वरोगप्रहाणं
निर्व्याजं शर्मकारि द्रुतमथ वशमेत्युत्पलाक्षीसहस्रम् ॥१८॥

मुखरः—जा एव्वं ता भक्खिस्सं । [यद्येवं तदा भक्षयामि] (इति मुखे निक्षिप्य अक्षिणी निमील्य रसमास्वाद्य) भो गुरुदेअ, कसाइदा मे जीहा । पज्जलइ गलो ता किं कादव्वं । [भो गुरुदेव, कषायिता मे जिह्वा । प्रज्वलति गलस्तत् किं कर्त्तव्यम् ?]

मूढेश्वरः—निखिलनदीपतेस्सागरस्य जलं पीयताम् ।

---

१. जप्त जप्तदीसनयदतुल—अ. (क.) ।

मुखरः—(तथा कृत्वा क्षारमभिनीय च) गुरुदेअ, दंसोवरि दंसो संवुत्तो। [गुरुदेव, दंशोपरि दंशः संवृत्तः।]

मूढेश्वरः—वत्सौ, शपथं कुरुतम्।

जगद्वञ्चकः—शपामि गुरुदेवस्य चरणाभ्यां यदि वक्ष्यमाणां वार्त्तां कस्याप्यग्रे कथयिष्ये। (इति मूढेश्वरस्य पादे जलमुत्क्षिप्य नमति)

मूढेश्वरः—वत्स, त्वमपि कुरु।

मुखरः—ण जाणे सबहं कादुं, कहं उण करीअदि ! [न जाने शपथं कर्तुं, कथं पुनः क्रियते !]

मूढेश्वरः—यथावृत्तं जगद्वञ्चकेन।

मुखरः—जइ एव्वं ता अहिअं किं वि करिस्सं। [यद्येवं तदाऽधिकं किमपि करिष्ये।] (इति जलमादाय) सवामि गुरुदेअस्स चलणेहिं जइ पुणो गुरुदेअस्स वि कहिस्सं। [शपामि गुरुदेवस्य चरणयोः यदि पुनरपि गुरुदेवस्यापि कथयिष्ये।] (इति पादयोः पतति)

मूढेश्वरः—वत्सौ श्रूयताम्। अद्यतः अष्टादशदिनपूर्वां (दिनां) [1]गतायां चतुर्दश्यां शुण्ठाचार्यन्तवनमनु गतोऽहं भगवतो भवानीवल्लभस्य पूजायै। तत्र च निजतनुविश्रीकृतहरिद्रा निजवर्णककविमुख-[2]वृतमुद्राविद्रावितनिखिलनरनिद्रा विलासिनी।

गोकर्णतर्णकविलोलविलोचना सा
नासापुटेन च तिरस्कृतकामभस्त्रा।
कामैककार्मणिककार्मणमञ्जुगात्रा
नेत्रातिथिर्मम बभूव निशेशवक्त्रा॥ १९॥

तद्दिनमारभ्य पञ्चेषु पञ्चेषु तूणीरान्तःकरणः तूष्णीमुपतिष्ठामि। तदागच्छतामद्यापि नरीनृत्यन्ती वरावर्ति मे सुन्दरी। तामुद्वीक्ष्याऽऽनन्दकन्दलीकलितस्वान्तःसुखतरङ्गिणीप्रेङ्खत्तरङ्गावलीसमवलीढः स्थास्ये। (इति सर्वे परिक्रामन्ति)

---

१. पूर्वं यातायां—ब.। २. कृतमुद्रा—ब.।

(नेपथ्ये)

तिष्ठ मूढेश्वर, क्व यासि। मां मिलित्वाऽग्रतो गच्छ।

(सर्वे सभयमवलोकयन्ति)

जगद्वञ्चकः—भो गुरोः, क एष वैशाखनन्दन इव धूसराङ्गरुहो दृश्यते ?

मुखरः—सच्चं। को एसो उद्दतबाहुदंडओ किलकिलाअंतो साहसिओ विअ इदो ज्जेव आअच्छेदि। [सत्यम्। क एष उद्धतबाहुदण्डो किलकिलाशब्दं कुर्वन् साहसिक इव इत एवागच्छति]

मुढेश्वरः—(विभाव्य) एष [1]ब्रह्मानन्दस्वामी शिष्येण सहोपैति। तदेतस्य न्यग्रोधस्य छायायां मलयानिलवीज्यमानगात्रा एवोपतिष्ठामः। (तथा कृत्वा पवनस्पर्शसुखमनुभवन्ति)

मुखरः—गुरुदेअ, केअइकुसुममअरंदमिलिदचंदणरेणु गंधवओ सुहअदि [2]कण्णाइं। [गुरुदेव, केतकीकुसुममकरन्दमिलितचन्दनरेणुगन्धवहः सुखयति कर्णौ।]

(ततः प्रविशति यथानिर्दिष्टः [3]ब्रह्मानन्दस्वामी)

ब्रह्मानन्द स्वामी—(सगर्वं स्वगतम्) मत्तोऽपि कः सौन्दर्यमनुधत्ते। यतः—

मां दृष्ट्वाऽमरनरपन्नगाङ्गनानां
प्रीतीनामविकलमेकपात्रमाशु।
कन्दर्पो निशिततरैः शरैर्जितश्री-
मद्गात्रैः प्रहरति वीतगात्र एषः॥ २०॥

तद् भवतु। सखायं मूढेश्वरं मिलित्वा यथोचितमनुतिष्ठामि। (प्रकाशम्) वत्स पाप, कुत्रास्ते वयस्यो मे मूढेश्वरः ?

पापः—ण आणे सो तुम्हाणं पिअवअस्सो मूढेसरो कहिं गदो त्ति। [न जाने सः युष्माकं प्रियवयस्यो मूढेश्वरः क्व गतः इति।]

---

१. कृष्णानन्द–ब.। २. करणाइं–ब.। ३. कृष्णा–ब.।

ब्रह्मानन्द स्वामी—(सर्वतोऽवलोक्य) एषोऽस्माकं प्रियवयस्यो न्यग्रोधपादपाधः सहान्तेवासिभ्यां किमपि मन्त्रयन्नुपविष्ट आस्ते। तद्यावदुपसर्पामि (उपसृत्य) (नाट्येन सर्वे उपविशन्ति)

मूढेश्वरः—अपि कुशली भवान् सशिष्यः।

ब्रह्मानन्द स्वामी—अधुनैव भवद्दर्शनपूतस्य कुतो न शर्मसम्भाराः। (गर्वमभिनीय 'मां दृष्ट्वेति' पद्य (१।२०) पुनः पठति। जगद्वञ्चकमुखरौ सहस्त-तालमुच्चैर्हसतः।)

ब्रह्मानन्द स्वामी—(विहस्य) इमौ कौ ?

मूढेश्वरः—शिष्यौ।

ब्रह्मानन्द स्वामी—त्वादृशौ स्तः।

मूढेश्वरः—ततोऽप्यधिकौ।

(सर्वेऽपि परस्परं हसन्ति)

मूढेश्वरः—(पापं निर्दिश्य) वयस्य क एषः ?

ब्रह्मानन्द स्वामी—प्रियान्तेवासी।

मूढेश्वरः—किं जातीयः ?

ब्रह्मानन्द स्वामी—कुविन्दः।

मूढेश्वरः—वयस्य, अन्येऽप्यन्तेवासित्वेनाचरिताः केऽपि ?

ब्रह्मानन्द स्वामी—बहवः। का खलु तत्र वार्ता। पश्य—

यवनशूद्रकुलालकुविन्दको-
ट्टकृषीवलगोपक-शौण्डिकाः।
अगणिता गणिकाः परिलम्भिता
श्रवणमूलजपान्निजशिष्यताम ॥ २१ ॥

मुखरः—रे गव्वसील, अम्हाणं वि गुलुचलणेहिं सिस्साणं कोडिओ किदा। ता किं णिमित्तं मुक्खगव्वं उव्वहेसि। [रे गर्वशील, अस्माकमपि गुरुचरणैः शिष्याणां कोटिः कृता। तत् किन्निमित्तं मूर्खगर्वमुद्वहसि।]

ब्रह्मानन्द स्वामी—सत्यमेव मुखरः।

मूढेश्वरः—पूर्वमित्रमपूर्वदर्शनोऽस्माकं ब्रह्मानन्द स्वामी । तदलमनेन मुधा मुखचालनेन ।

मुखरः—जइ एव्वं ता अम्हाणं दुदीओ गुरुदेओ जेव्व संवुत्तो। ण कहिस्सं दाव । एस पणमामि । [यद्येवं तह्र्यस्माकं द्वितीयो गुरुदेव एव सम्प्राप्तः । न कथयिष्ये तावत् । एष प्रणमामि ।]

ब्रह्मानन्द स्वामी—अभीष्टलाभी भूयाः । (विलोक्य विहस्य च) यत् समर्कट इवाकलयसे चेष्टया ।

मुखरः—अहं मक्कडो इव तुमं उण मक्कडो ज्जेव्व । [अह मर्कट इव त्वं पुनः मर्कट एव ।]

ब्रह्मानन्द स्वामी—क प्रणामः क पुनः मुखचापल्यम् ।

मुखरः—णेदं मुहचावल्लं चेट्ठा । [नेद मुखचापल्यं, चेष्टा]

ब्रह्मानन्द स्वामी—का पुनर्गुरूणां चेष्टा ?

मुखरः—ण जाणासि सुत्तं च । [न जानासि सूत्रमपि ।] (संस्कृतमाश्रित्य) 'गुरुणाऽपि समं हास्यं कर्तव्यं कुटिलं विना' ।

पापः—कहं रे अम्हाणं पि गुलुचलणेहिं चेट्ठा । [कथं रे, अस्माकमपि गुरुचरणैश्चेष्टा ।]

मुखरः—ण जाणासि रे जहा तुह गुरु तहा मह वि संवुत्तो। [न जानासि रे यथा तव गुरुस्तथा ममापि संवृत्तः ।]

(पापः मुखरोपरि [1]चपेटं ददाति । मुखरः प्रतिकूलं ताडयति । इति द्वावपि युद्धतः । मूढेश्वरब्रह्मानन्दौ वारयतः ।)

ब्रह्मानन्द स्वामी—तिष्ठतु भवान् ।…प्रस्थितः ।

मुखरः—अह्माणं गुरुदेअस्स एवका वारबिलासिणी चिट्ठदि । तहिं अह्माणं गुरुदेओ गमिस्सदि । [अस्माकं गुरुदेवस्यैका वारविलासिनी तिष्ठति । तत्रास्माकं गुरुदेवो गमिष्यति ।]

---

१. मुखरोपरि मुष्टिः-अ. ।

ब्रह्मानन्द स्वामी—वयस्य, सत्यं त्वय्यनुरक्ता !

(मूढेश्वरस्तूष्णीमास्ते)

मुखरः—ण आणे तं विहिणो णिम्माणं कुसुमाउहस्स अपुव्वं कम्मणं दाडिमीबीअसोहिरअणं इत्थिआरण्णं अह्माणं गुरुदेवम्मि अणुरत्तं ण वेत्ति गुरुदेओ ज्जेव्व पुच्छीअदु । [न जाने तद्विधेर्निर्माणं कुसुमायुधस्यापूर्वं कार्मण्यं दाडिमीबीजशोभिरदनं स्त्रीरत्नमस्माकं गुरुदेवेष्वनुरक्तं न वेति गुरुदेव एव पृच्छताम्)

(मूढेश्वरः सक्रोधमक्ष्णा तर्जयति)

जगद्वञ्चकः—वत्स मुखर, शपथे वृत्तेऽपि कोऽयं ते दुराचारपरिग्रहः यद्गुरुं गुरुकोपमुत्तालयसि ।

मुखरः—भो जेट्ठ किं अह्मेहिं अणुट्ठिदं । अस्स भक्खिदविवेअस्स गुरुदेअस्स एण्हिं तुण्हिं को भोदि । सवहो वि मे वट्टदि । जइ एदस्स अग्गदो कहिस्सं तह मे सवहभंगो । अहं उण अण्णस्स अग्गदो भासेमि । [भो ज्येष्ठ, किमस्माभिरनुष्ठितम् । अस्य भक्षितविवेकस्य गुरुदेवस्येदानीं त्वमपि कः भवति । शपथः अपि मे वर्तते । यद्येतस्याग्रतः कथयिष्ये तदा मे शपथभङ्गः । अहं पुनरन्यस्याग्रे भाषयामि ।]

मूढेश्वरः—वयस्य ब्रह्मानन्द, त्वं पुनः कुत्र प्रस्थितः ?

ब्रह्मानन्द स्वामी—त्वमादौ स्वमुखादभिधास्यसि तदा कथयिष्ये ।

मूढेश्वरः—एष कथयामि । शृणु—

वसन्तलतिकावि[1]द्धमनोभृङ्गानुहारिणी ।
बाला शरद्घनालीव मुमोच न च जीवितम् ॥ २२ ॥

[2]तद्दिनादारभ्य पीडित एव वसन्तदिनमनुभवामि । तदितः कथय त्वमपि निजोदन्तम् ।

ब्रह्मानन्द स्वामी—ममाप्येकाऽस्ति पद्माभिधाना वारविलासिनी । तत्राहमपि गच्छामि ।

(इति सर्वे परिक्रामन्ति)

---

१. विद्वन्–ब. । २. दिनमारभ्य.–ब. ।

(नेपथ्ये)

चक्कंगसत्थरम्मे सरोवरे उह हंसवहुं।
कंतविरहअविसुरंतहिअआ हिंडइ पोम्मवणे ॥ २३ ॥

[चक्राङ्गसार्थरम्ये सरोवरे पश्य हंसवधूः।
कान्तविरहकखिन्नहृदया चरति पद्मवने ॥]

(सर्वे कर्णं ददति)

मुखरः—भो गुरुदेअ, किं वण्णणिज्जं । सुणु । [भो गुरुदेव, किं वर्णनीयम् । शृणु—

सद्दो सो णेउराणं परिअणरसिदं मद्दलुद्दामसद्दो
तालाणं णिम्मलाणं झणझणरसिदं णाइआए अ गीदी।
एक्कीभूदं अ सव्वं सअणपुडगदं[1] पफ्फुडं अक्खरं ता
गीदोए किं वि आणे पढणपडुतरा का वि सत्ती अ तीए ॥ २४ ॥

[शब्दोऽसौ नूपुराणां परिजनरसितं मर्दलोद्दामशब्दः
तालानां निर्मलानां झणझणरसितं नायिकायाश्च गीतिः।
एकीभूतञ्च सर्वं श्रवणपुटगतं प्रस्फुटम् अक्षरं तत्
गीतस्य किमपि जाने पठनपटुतरा काऽपि शक्तिश्च तस्याः ॥]

मुढेश्वरः—सैवास्माकं मनश्चन्द्रिका वसन्तलतिका।

मुखरः—इच्छिआ उण किं भोदि! [इच्छिता पुनः किं भवति!]

मुढेश्वरः—वत्स, अधुनैव त्वयोपवर्णितं पुनः पृच्छयसे।

मुखरः—सुदं क्खु वण्णिदिअं। [श्रुतं खलु वर्ण्यते।]

मूढेश्वरः—(विचिन्त्य। स्वगतम्) अयं गाथार्थो ममोपरि स… ति जानामि। यन्मद्विरहान्ता वसन्तलता भविष्यति।

(इति दवथुमभिनीय निःश्वस्य च)

अहोरात्रमहो कान्तविरहो दुस्सहो मम।
बाधते भानुचन्द्राभ्यां द्विगुणीकृतविग्रहः ॥ २५ ॥

---

१. पुहमदं—ब.।

(विलोक्य) एष शुण्ठाचार्यो नीलकण्ठपुरतः तिष्ठति। (नृत्यन्तीं वसन्तलतामवलोकयन्) एषा च परिषद्। भवतु यावदुपसर्पामि।

(सर्वे उपविशन्ति। ततः प्रविशति यथानिर्दिष्टः शुण्ठाचार्यः)

शुण्ठाचार्यः—(मूढेश्वरं विलोक्य उत्थाय च) नाम भण।

(इति सर्वे उत्थाय नाम भणन्ति यथोचितमुपविशन्ति च)

मुखरः—भो गुरुदेअ, इच्छिआ णं माणुसी एव्व भोदि। अहं उण जाणामि रक्खसकुडुंबिणी। [भो गुरुदेव, इच्छिता खलु मानुषी एव भवति। अहं पुनर्जानामि राक्षसकुटुम्बिनी।]

मूढेश्वरः—वत्स एषैव स्त्री। (विलोक्य) कथमेषा योषा शेषावयवैस्तोषयति। अस्याश्च—

धातापीयूषचन्द्रोज्ज्वलजलजलसत्सारपूरैः कृशाङ्ग्या
वक्त्रं चक्रे शरीरं कनकगिरिदरीचारुचामीकरौघैः।
श्वासं पाठीरवातैः कुचयुगसुषमां मत्तमातङ्गगण्डैः
पाण्योर्मा पल्लवौघैरधरतललसन्माधुरीं तां [1]सुधाप्तिः॥ २६॥

जगद्वञ्चकः—(विलोक्य)

साफल्यमद्य जनुषो मम चक्षुषोऽपि
दृष्टा यतो भवति तोयजमालिकेयम्।
यस्याश्च वक्त्रकुचपाणिपदारविन्द-
मध्ये स्थितं तरलवन्नवनाभिचक्रम्॥ २७॥

मुखरः—(सनिःश्वासं तापमभिनीय)

विज्जुरिल्लकणअच्छविगत्ता पप्फुरंतणववारिअणेत्ता।
जं णिवस्सइ सरेहिं किसंगी तं विआणइ रईसरसंगी॥ २८॥
[विद्युत्कणस्वच्छगात्रा प्रस्फुरन्नववारिजनेत्रा।
यं निबध्य शरैः कृशाङ्गी तं विजानीहि रतीश्वरसङ्गी॥]

जगद्वञ्चकः—भो गुरुदेव, पश्य।

---

१. सुधाभिः—ब.।

सौदामिनीव सहसाम्बरमाविधूय
शातोदरी सपदि सौधमुपाजगाम।

मूढेश्वरः—(विलोक्य निःश्वस्य च) वत्स, न केवलं वस्त्रं विधूय गता।

चञ्चच्चलन्नयनमाशु च मामकीनं
गाढं निखाय हृदयं नयनान्तपातैः॥ २८॥

तद् भवत्वनुगच्छामि। (उत्थाय गन्तुमिच्छति)

शुण्ठाचार्यः—क्व पुनर्गन्तुमीहितं भवता।

मूढेश्वरः—भगवतो भवानीवल्लभस्य सपर्यापर्याकुलस्य भवतोऽर्थां सामग्रीं समर्धयितुम्।

शुण्ठाचार्यः—तत् सपदि सम्पादय।

मूढेश्वरः—तथेति।

(इति शिष्याभ्यां सह निष्क्रान्तः)

मुखरः—भो गुरुदेअ, पेक्ख पेक्ख। एसा किं वि किं वि चिंतअंती तुह विरहखिण्णहिअआ चिट्ठदि वसंदलदिआ। [भो गुरुदेव, पश्य पश्य। एषा किमपि किमपि चिन्तयन्ती तव विरह खिन्नहृदया तिष्ठति वसन्तलतिका।]

मूढेश्वरः—कथमेषा प्रिया ह्रियाऽवनतमुखी तिष्ठति। भवतु। यावदुपसर्पामि। (उपसृत्य) प्रिये वसन्तलतिके!

वसन्तलता—एसो बुड्ढो जडिलो उण मूढेसरी। [एष वृद्धो जटिलो पुनः मूढेश्वरः।]

मूढेश्वरः—किं वदति मम प्रियतराऽतितरां शिरीषमृद्वी मृद्वीका-मृद्वीभिर्गीभिः। (किञ्चिदवलोक्य। सरभसमुपसृत्य) प्रियेलतिके, ननु न जानासि यदयं यतीयती वेदनां न प्राप्नोति?

वसन्तलतिका—ण जाणामि सव्वं। अज्ज अज्ज रमणीअं। [न जानामि सर्वम्। अद्य आर्य रमणीयम्।]

(इति कामावस्थया वाक्स्तम्भं नाटयति)

मूढेश्वरः—(सहर्षम्) किमद्य रजनीमधिकृत्यायास्यसि मद्भवनं पवित्रयितुम्।

वसन्तललिका—णहि णहि अज्ज अज्ज रअणिम्मि खमेहि दाव। अहं उण सच्चं वदामि। दुदीअदिअसरअणिम्मि आअमिस्सं। [नहि नहि आर्य, अद्य रजन्यां क्षमस्व। अहं पुनः सत्यं वदामि। द्वितीयदिवसरजन्यामागमिष्यामि।]

मूढेश्वरः—(सविषादं कामावस्थां नाटयन्) सुन्दरि किं ब्रवीषि वद तावत्।

क्षणो वर्षायते बाले क्षपयामि कथं क्षपाम्।
नीहारकरदावाग्निकलितां [१]तुलया तुलयानि वा ॥३०॥

मुखरः—(आत्मगतम्) अज्ज वि एदस्स बुढ्ढ जडिलस्स इत्थिआए इच्छा ण णिवट्टेदि। [अद्याप्येतस्य वृद्धजटिलस्य स्त्रियाः इच्छा न निवर्तते।] (प्रकाशम्) वसंदलदिए, सच्चं अम्हाणं गुरुदेओ तुमं जेव्व चिंतअंतो गलितच्छि दिउणिदमंसो इरिसो जादो ता अणुकंपेहि णं। [वसन्तलतिके, सत्यमस्माकं गुरुदेवः त्वामेव चिन्तयन् गलिताक्षिः द्विगुणितमांसः ईदृशो जातस्तदनुकम्पयैनम्।]

मूढेश्वरः—आः पापस्य सर्वत्र मुखरता। (वसन्तलतामुद्दिश्य) जीवयैनमद्यागमनेन।

वसन्तलतिका—जं भवं आणवेदि। [यद्भवानाज्ञापयति]

(जगद्वञ्चकः ग्रन्थिं दर्शयति। मूढेश्वरः उत्थाय नृत्यति)

मुखरः—भो गुरुदेअ, को एसो चंदणभूसिदकलेअरो मीलंतेहिं अच्छीहिं किं वि चिंतअंतो इदो ज्जेव्व आअच्छदि। ता ओलोएहि णं। [भो गुरुदेव, क एष चन्दनभूषितकलेवरो मीलन्नेत्रः किमपि चिन्तयन्नित एवागच्छति। तदवलोकयैनम्।]

मूढेश्वरः—(विलोक्य) एष प्रियवयस्यो मे शुण्ठाचार्यः। तत् प्रविशामि पूजागृहम्। (इति पूजागृहप्रवेशं नाटयति)

---

१. नु त्वया विना—ब.।

(ततः प्रविशति यथानिर्दिष्टः शुण्ठाचार्यः)

शुण्ठाचार्यः—एष मे प्रियवयस्यो मूढेश्वरः पूजागृहे तिष्ठति। यावदुपसर्पामि। (उपसृत्य) वयस्य, वृत्तं सपर्योपकरणम्।

मूढेश्वरः—वयस्य, इदं क्रियते।

शुण्ठाचार्यः—सम्पादय शीघ्रम्। पश्यैनं नभसो मध्यदेशवर्तिनं प्रचण्डमरीचिमालिनं दिनेनम्। मध्याह्नमेनं वदन्ति मनीषिणः। तथा ह्यधुना—

तपति खरमयूखः क्षीयतामेति तोयं
कमलदलनिषण्णाश्चञ्चरीकाः प्रयान्ति।
बहुतरमकरन्दोत्सिक्तमध्याश्च[1] शीघ्रं
घनसरसिजराजि (जीं) राजहंसास्सरन्ति ॥ ३१ ॥

मूढेश्वरः—(ऊर्ध्वमवलोक्य) यतो नभोमध्यमध्यास्ते भानुमाली तज्जातो मध्याह्नसमयः। तथाहि सम्प्रति—

चण्डांशुचण्डकिरणैर्विकसत्पलाश-
मुत्तानितश्च कमलं कमलं करोति।
एषा चटुगंत (?) वधूर्नवघर्मबिन्दून्
हारान् उरोजयुगले खलु वेत्ति मुग्धा ॥ ३२ ॥

अपि च—

गण्डं फुल्लत्सरोजव्यतिकरशिशिरैः शीकरैः शुण्डपातैः
सिञ्चन् मन्दं करेणोर्निजमपि च करी निर्वृतिं सन्तनोति।
दीप्यच्चण्डांशुचण्डातपविवृतमुख··· ष्ट डिण्डीरितास्यः
पानीयोन्मज्जनानां कुतुकमभितनोत्याशु सोऽयं कुलायः ॥३३॥

शुण्ठाचार्यः—तत् सपदि वद। किन्तेऽभिरोचते भिक्षायै ?

मूढेश्वरः—अलमनया भिक्षया। युष्मद्दर्शनमेवास्माकं भिक्षा। यद्याग्रहस्तर्हि किमनेन श्रान्तजनेन क्रियताम् यदभिरोचते भवते।

---

१. मध्याह्न–ब.।

शुण्ठाचार्यः—तथाप्यभिधीयताम् ।

मूढेश्वरः—यद्येवं तर्ह्यभिधीयते । शृणु—

दुग्धं मुग्धसरोजसुन्दरमुखीहस्ताम्बुजावर्तितं
शाकश्चापि शुकच्छदच्छवि तथा पेयं पयः पायसम् ।
मुक्ताहारि च तक्रमिन्दुकिरणस्वच्छं यथेच्छं दधि
स्वादु छागपतेः पलं मनयते मीनो नवीनोऽधुना ॥ ३४ ॥

अपि च—

वटिका चणकस्य कोमला-
मलिका सङ्कुलिताज्यपाचिता ।
नवमाषसुपूर्णपूरिका
सितखण्डाः खलु शुण्ठ रोचते ॥ ३५ ॥

शुण्ठाचार्यः—तर्ह्यागच्छ । गच्छावः ।

(इति निष्क्रान्ताः सर्वे)

इति प्रथमः सन्धिः ।

अथ द्वितीयः सन्धिः

(ततः प्रविशति शिष्याभ्यामनुगम्यमानो मूढेश्वरः)

मूढेश्वरः—वत्स मुखर, अवेहि कियदवशिष्टमहः । व्याकुलयतितरां मे मनो मनोजपञ्चवाणी । वाणीमपि वक्तुमशक्तोऽस्मि ।

मुखरः—(ऊर्ध्वमवलोक्य) भो गुरुदेअ दाणिं क्खु भअवं सहस्सरस्सी रस्सिणिअरमज्झमज्झम्मि विणिविसिअ कुंकमपंअसंकुलिदकामिणीकरअलसिरिसं उवक्खिवअंतो मंडलसेसो पडदि । किं अ उक्खिणाओ तारआओ । [भो गुरुदेव, इदानीं खलु भगवान् सरस्त्ररश्मि रश्मिनिकरमध्यमध्ये विनिवेशितकुङ्कुमपङ्कसङ्कुलितकामिनीकरतलसदृशम् उपक्षिपन् मण्डलशेषः पतति । किञ्च उद्भिन्नाः तारकाः ।]

मूढेश्वरः—(ऊर्ध्वमवलोक्य) सम्प्रति हि—

दिनमणिरयमच्छां पद्मिनीदक्षिणां मां
रविरविरततेजा उत्तराशाविहाय ।
पतति बत निषेवन् वारुणीं रागशोणा-
मिति हसति (हि) ताराच्छद्मना शक्रकाष्ठा ॥ १ ॥

मुखरः—दाणिं क्खु वरुणदिसाविलासिणीए किदसंकेदो संभोअसंठाविदचित्तउत्ती अत्थगिरिकाणणं पइट्ठो जलजमित्तो जादो अकठोरो ताराविसरो । [इदानीं खलु वरुणदिशाविलासिन्या कृतसङ्केतः सम्भोगसंस्थापितचित्तवृत्तिरस्तगिरिकाननं प्रविष्टः जलजमित्रो जातोऽकठोरः ताराविसरः ।]

मूढेश्वरः—(निपुणं विलोक्य)

सम्प्रेषिते दिनमणौ नियमानुबन्धं
सन्धाय गाढतिमिरेण मलीमसेयम् ।
नायाति अद्य इति तद्दिनशून्यबिन्दून्
तारामिषेण तनुते पुरुहूतकाष्ठा ॥ २ ॥

मुखरः—दाणिं क्खु जणितंधं णीलकंठकंठपीठादो जादं व्व, मरगअमणिकूटादो पहुदं व्व, करटिदाणरिंछोलीदो उप्पणं व्व मसीसहस्सादो पिसुणजणहिअअसरिच्छं अच्छं तमो विसरदि तिहुअणभंडम्मि। जादं अ कठोरतरतारआ णिक्करुक्कंतदुद्धमुहमोत्ताहलिअं व्व खंडिदाक्खिदअक्खरराइ जुत्तं व्व णहोअलं। [इदानीं खलु जनितान्धं नीलकण्ठकण्ठपीतात् जातमिव, मरकतमणिकूटात् प्रवृत्तमिव, करटिदानभ्रमरावलितः उत्पन्नमिव, मसीसहस्रात् पिशुनजनहृदयमध्यं तमो विसरति त्रिभुवनभाण्डे जातमकठोरतरतारतारकनिकरोद्भ्रान्तदुग्धमुग्धमुक्ताफलमदिव खण्डिताक्षताक्षरराजियुक्तमिव नभस्तलम्।]

मूढेश्वरः—(विलोक्य) सत्यमन्धतमसमतितरां वरीवर्ति। तथाहि—

छिन्दन् लोहितपीतशुक्लहरितां नाम्नः कथां विष्टपे
भिन्दन् लोचनयोस्त्रिलोकजनुषो वृत्तिं जनस्य द्रुतम्।
कुर्वन्नीलमणिप्ररोहखचितं दिग्रोदसीकन्दरं
मातङ्गद्युतिदिङ्मुखेषु तिमिराद्वैतं समुज्जृम्भते ॥ ३ ॥

अपि च—शिखरिशिखररूढः शाखिशाखानिषण्णो
विपिनमथ विकीर्णस्तर्णवार्णश्च तीर्णः।
तिरयति तिमिरौघे नेत्रवृत्तिं जनानां
पवनज इव साक्षाद् यातुधानाङ्गनानाम् ॥ ४ ॥

अपि च—ध्मातौघमेघं फणिरत्नरश्मि-
शक्रायुधं सम्प्रति कामिनीनाम्।
खद्योतविद्युद्भ्रमणं गताना-
मक्षक्षमं श्वभ्रमिवातनोति ॥ ५ ॥

मुखरः—दाणिं क्खु अवस्साअकिरणो पुव्वदिसावहूमंडणभूदो कालसे अपुंजछविछुरिदमंडलदाए व्विअ अरुणो संपदं क्खु विहुरकामिणीणअणगंडपंडुच्छवी पहूदक्खअक्खीणदाए व्व पंडुरो अहुणा अ सोडसकलाकलिदो दुद्धसाअरमुद्धमोहविसरो बिसकंदलीदावदाहणो विसमविसिहमित्तदाए विरहिणी मणोहरणो कुमुदिणीपीऊसवरिसकिरणो

पीऊसकिरणो णहोअलविउलप्पासादसिहरम्मि अहिअं सोहेदि ।
[इदानीं खल्ववश्यायकिरणः पूर्वदिशावधूमण्डनभूतः कालशेयपुञ्जच्छविच्छुरित-मण्डलतयेवारुणः, साम्प्रतं खलु विधुरकामिनीनयनगण्डपाण्डुच्छविः प्रभूतक्षय-क्षीणतयेव पाण्डुरः, अधुना च षोडशकलाकलितः दुग्धसागरमुग्धमोहविसरो बिसकन्दलीदावदहनो विषमविशिखमित्रतया विरहिणीमनोहरणः कुमुदिनी-पीयूषवर्षिकिरणः पीयूषकिरणः नभस्तलविपुलप्रासादशिखरेऽधिकं शोभते ।]

मूढेश्वरः—(ऊर्ध्वमवलोक्य) कथमारूढ एव गगनप्रासादशिखरं भगवान् मृगलाञ्छनः । तथा हि—

पूर्वं बालमृणालनालसदृशाः स्वर्मार्गसञ्चारिण-
श्चञ्चत्पुष्करिदन्तदण्डमुसलस्पर्धाकराः सम्प्रति ।
शीतांशोः किरणाः पतन्ति वसुधापृष्ठे सुधास्यन्दिनः
सिञ्चन्तश्चलचारुचञ्चुपुटकान् क्षीबान् चकोरान् मुहुः ॥ ६ ॥

जगद्वञ्चकः—(विलोक्य) केतकदलद्रोणीश्रेणीस्पर्द्धाकरैः करै-रतितरां रोदसीकन्दरं हरिणयति हरिणलाञ्छनः । सम्प्रति हि—

वासोऽर्जुनं विचकिलै रसनाभिरामा
माणालतन्तुरचितानि च कङ्कणानि ।
कान्ताभिसारसमये ललनाजनाना-
मित्थं भवन्ति सकलानि विभूषणानि ॥ ७ ॥

(विलोक्य) अहो मध्यरात्रम् । सम्प्रति हि—

भ्रान्ति तनोति निखिलस्य च दीपवल्ली
सञ्चित्रितेति विरमत्यपि लोकशब्दः ।
एषोऽभिसर्पति रवः सुरताभिमत्त-
पाथोजसुन्दरमुखीभुजकङ्कणानाम् ॥ ८ ॥

मूढेश्वरः—(शीतभानुमवलोक्य तापमभिनीय च)

रत्नाकरश्च भगवाँस्तव जन्मभूमि-
रीशस्य मौलिनिलये वसतिस्त्वदीया ।

हंहो तुषारकर किं वितनोषि ताप-
मङ्गेषु हन्त कुसुमेषुवृतज्ज्वरेषु ॥ ९ ॥

अथवा—

दोषाकरः कलङ्की प्रियतरमित्रश्च कालकूटस्य ।
स्थाने कुरङ्गलाञ्छन दहसि शरीरं प्रियावियुक्तानाम् ॥१०॥

वत्स जगद्वञ्चक, वत्स मुखर, गच्छानय कुमुद्वतीशीतभानवीयां कलामवलां वसन्तलतिकाम् ।

मुखरः—भो अज्ज बुड्ढो तुमं ण विरमेसि इत्थिआतिण्णादो उण्हं णीसासरिंछोलिअं मुंचेसि । [भो आर्य, वृद्धस्त्वं न विरमसि स्त्रीतृष्णया उष्णं निश्वासनिकरं मुञ्चसि ।]

मूढेश्वरः—किं करोमि । कामोऽतितरां मां बाधते ।

किञ्च—

इयं सा कर्णाटी त्रिभुवनवधूटी विजयिनी
तथा चेयं वाटी प्रचुरतरपाटीरकलिता ।
तटीयं पम्पायाः पवनपरिपाटीवृतरुचिः
मनोधाटीमेतन्नटयति मनोभूरपि मुहुः ॥ ११ ॥

तदाशु कुसुमाशुगाशुगताड्यमानहृदयो न तद्वियोगमुरीकर्तुमुत्सहे । आनयावदातकरप्रतिपक्षवदनां ललनाम् ।

जगद्वञ्चकः—(स्वगतम्) दुष्टः खलु वृद्धोऽसौ । तद्भवत्वेनं वञ्चयामि । (प्रकाशम्) यथा गुरुदेव आज्ञापयति । (इति मुखरेण सह निष्क्रान्तः)

मुखरः—भो जेठ्ठ, एदं खिडिक्किआदुआरं, ता प्पविसह्ह । (इति तथा कुरुतः । जगद्वञ्चकः छोटिकां ददाति संज्ञया विकटं रौति च । ततः प्रविशति वसन्तलतिका)

जगद्वञ्चकः—कान्ते, स्वागतं भवत्याः ।

वसन्तलतिका—दाणिं क्खु । [इदानीं खलु]

जगद्भुजङ्गकः—प्रिये, पश्य। एष सरसघनचन्दनवनसञ्चारी वाति सदागतिः । तदेतां हरिणलाञ्छनकिरणच्छविच्छुरितसुधालक्षितां पान्थपरिश्रमहरणचतुरवेदिकामालम्ब्य क्षणं शिखिप्रत्युक्षणं कुर्मः । (इति परिक्रामति)

जगद्भुजङ्गकः—वल्लभे, देहि सम्प्रति मारविलासमन्दिरे मन्मथ-क्रीडाशीविषं वस्तुम् ।

वसन्तलतिका—हीही माणहे आसीविसे ता भीदीए उक्कंपिदह्मि। [ही ही मन्मथे आशीविषस्तदा भीत्योत्कम्पिताऽस्मि ।]

(जगद्भुजङ्गकमुखरौ सहस्ततालमुच्चैर्हसतः)

मुखरः—णहि णहि सप्पो अण्णं किं वि । [नहि नहि सर्पोऽन्य-त्किमपि]

वसन्तलतिका—(सहर्षम्) जाणिदं क्खु से दुठ्ठत्तणं। ता णत्थि एत्थ तुह अवठ्ठाणजोग्गो देसो। भाडअं क्खु बहु एदस्स मअणघरस्स। [ज्ञातं खल्वस्य दुष्टत्वम् । तन्नास्ति अत्र तवावस्थानयोग्यो देशः । भाटकं खलु बह्वेतस्य मदनगृहस्य ।]

जगद्भुजङ्गकः—तिष्ठति भाटकम् ।

वसन्तलतिका—किं ! [किम्]

(जगद्भुजङ्गकः ग्रन्थि दर्शयति ।)

वसन्तलतिका—सच्चं । परं मूढेसरो दुम्मणाअंतो व्व भोदि। [सत्यम् । परं मूढेश्वरो दुर्मनायमान इव भवति ।]

जगद्भुजङ्गकः—दयिते,

एतस्मिन्नभिनवचन्दनावकीर्ण
कान्तारे कुरु कमलाक्षि केलिबन्धम् ।
साफल्यं रचय निजस्य जन्मनस्त्वं
किं वा ते जरठतरेण तेन कार्यम् ॥ १२ ॥

इतस्तु नेदीयान् गुरुस्तदागच्छ गच्छामः।

(ततः प्रविशत्युन्मत्तो मूढेश्वरः)

मूढेश्वरः—(पार्श्वतोऽवलोक्य) एषा मे प्रिया बालविटपबाहुभिस्सहकारमालिङ्ग्य सुखमनुतिष्ठति । तद् गत्वा सहकारं शिक्षयामि। (इत्युणं गृहीत्वा रसालं प्रताड्य लतामुपेत्य च) प्रिये, नेदं तवोचितं मुख्नम्।

कलय कमलनेत्रे मां दृशोरन्तपोते-
रमृतकिरणवक्त्रेऽनल्पकल्पं प्रजल्प्य।
सुतनु वि तनुगात्रैः पेलवैरङ्कपालीं
परिहर दवथुं मे स्वेदनीराक्षिसिक्तैः॥ १३॥

(लतामालिङ्ग्योत्थाय च दण्डवत् प्रणम्य प्रणिधानेनावतिष्ठति)

जगद्वञ्चकः—(पुनरेतस्मिन् इत्यादि पद्यं पठति)

मूढेश्वरः—(आकर्ण्य) अहो जगद्वञ्चको नयति प्रियाम्। तद् गत्वाऽऽनयामि। (विचिन्त्य) सत्यं खलु जगद्वञ्चकः। (अग्रतो गत्वा) प्रिये वसन्तलतिके,

जगद्वञ्चकः—क ते प्रिया। इयन्तु मम।

मुखरः—ते तु मादा। [तव तु माता]

जगद्वञ्चकः—ते तु स्नुषा।

(मूढेश्वरः दण्डकाष्ठमुद्यम्य ताडयतुमिच्छति। जगद्वञ्चको वसन्तलतिकां त्यक्त्वाऽऽरात् गच्छति। मूढेश्वरः वसन्तलतिकां गृह्णाति)

जगद्वञ्चकः—हास्यस्यैतस्याविनयस्य फलम् (इति सक्रोधं मुखरेण सह निष्क्रान्तः)

मूढेश्वरः—(चन्द्रकिरणस्पर्शमभिनीय) प्रिये पश्य पश्य।

तरुणकिरणनीवी वृद्धवर्त्मस्फुलिङ्गै-
रदहृदयमहोदः कायमह्नाय चन्द्रः।

सुतनु तव वियोगे सङ्गमे तेऽधुना मे
दवथुमथ विधूयाऽऽनन्दथुं सन्तनोति ॥ १४ ॥

(तस्याधः पञ्चशाखं हृदये निधाय)

मृणालीकूटः किं किमु पुटकिनीपत्रनिकरः
करः किं शीतांशो मुदिरकिरदासारविसरः ।
सुधायाः सारः किं रणरणकपीठे च हृदये
विनिक्षिप्तः कान्ते सुखयतितरां ते किसलयः ॥ १५ ॥

प्रिये वसन्तलतिके, ननु कुरु कुचयोश्चन्दनचर्चाम् ।

वसन्तलतिका—जं भवं आणदित्ति । [यद् भवानाज्ञापयति]

(इति तथा करोति)

मूढेश्वरः—(विलोक्य)

एकस्मिन् यदि चञ्चलाक्षि रचितः पाटीरपङ्कद्रवो
माऽन्यऽस्मिन् रचयस्व चन्द्रवदने गौराङ्गि वक्षोरुहे ।
इत्थं चेद्यदि संविधास्यसितरां द्रक्ष्यामि भूमीधरा-
वेकत्रैव सुमेरुशैलतनयाताती परं मेलितौ ॥ १६ ॥

(वसन्तलतिका तथा करोति)

मूढेश्वरः—(विलोक्य सानन्दमालिङ्ग्य च)

वलक्षपक्षप्रतिबद्धबिम्ब-
क्षपाकरस्पर्द्धितसुन्दरास्ये ।
जङ्घायुगं जीवितदायि रम्भा-
स्तम्भादुदञ्चत्कमनीयमीहे ॥ १७ ॥

(नेपथ्ये कलकलानन्तरम्)

तिष्ठ रे मूढेश्वर स्नुषापहारिन्, सत्यं खलु मूढेश्वरः यतः स्नुषामारूढोऽसि ।

मूढेश्वरः—अहो जगद्वञ्चकहतकः !

(पुनर्नेपथ्ये)

चिट्ठ रे दुट्ठ गरिट्ठ चिट्ठ । एसा अम्हे आअदा ।

[तिष्ठ रे दुष्ट गरिष्ट तिष्ठ । सते वयमागताः ।]

मूढेश्वरः—आः मुखरोऽपि । कष्टः खलु दैवदुर्विपाको दृश्यते ।

वसन्तलतिका—वेवदि मे हिअअं ण आणे किं भइस्सदित्ति ।

[वेपते मे हृदयं न जाने किं भविष्यतीति ।]

(ततः प्रविशतः राजपुरुषानुगम्यमानो जगद्वञ्चकमुखरो ।)

मुखरः—भो जेट्ठ, एसो वसंदलदिआदुदीओ मूढेसरो चिट्ठदि ।

[भो ज्येष्ठ, एष वसन्तलतिकाद्वितीयो मूढेश्वरस्तिष्ठति ।]

जगद्वञ्चकः—भो भो राजपुरुषाः, एष भुजङ्गो दुरात्मा मूढेश्वरः संयमनीय एतस्या एव केशरज्जुपाशैः ।

(पुरुषास्तथा कुर्वन्ति ।)

मूढेश्वरः—

कबरीभरेण सुतनोर्यदयं नियतस्तदप्यतिसुखाय मम ।
नवबर्हिबर्हिरुचिरावृतिना दयितं भवेद्दयितानोरुतरम् ॥१८॥

मुखरः—कहं रे मूढेसर, अज्जवि सुहअदि वसंदलदिआ । अम्हे एदं बुड्ढं तरट्टी वसंदलदिआ । (इत्यर्द्धोक्तौ विलोक्य) कहँ जिण्णमज्जारो विअ गुरगुराअंतो चिट्ठदि । भो गुरुदेअचलणमिस्सा, तुम्हाणं हलहलो तत्थ राजउले जेव्व भइस्सदि । [कथं रे मूढेश्वर, अद्यापि सुखयति वसन्तलतिका (इत्यर्द्धोक्तौ विलोक्य) कथं जीर्णमार्जार इव गुरगुरायमाणस्तिष्ठति । भो गुरुदेवचरणमिश्राः, युष्माकं कलकलस्तत्र राजकुले एव भविष्यति ।]

(नेपथ्ये)

भो भोः क्रियन्तां सरसचन्दनसान्द्रद्रवसेकशीतलतलाः केलिशैलशिखरनिर्झरिणीसैकतचत्वरभूभागाः, उत्थाप्यन्तां च शारदशर्वरीश्वरपाण्डुरकरनिकरच्छबिच्छुरितशोभमुन्नतप्रतानवितानं, उद्गिरन्तु नव-

स्सङ्गीतगीतानि, उपनयन्तु वनपालका प्रततिकुसुमस्रजः, धारयन्तु प्रतीहार्यश्चामरव्रजान्, विरमन्तु वेदध्वनयः, अलङ्कुर्वन्तु द्वारदेशं सौविदल्लाः । यतः—

नरपतिकुलमौलिप्रस्खलन्मल्लिमाला-
बहलपरिमलालीस्पष्टपादारविन्दः ।
उषसि रहसि वेदाकर्णनोद्भूतखेदो
हतमति-परिवारः पापचारः समेति ॥ १९ ॥

(ततः प्रविशति पापचारो विदूषकश्च)

राजा—वयस्यादेशय केलिगिरिनिर्झरिणीसैकतचत्वरमार्गम् ।

विदूषकः—एदु एदु भवं । एदं तं तुह ओट्ठाणजोग्गं थलं । ता एहि उपविसेह्म । [एत्वेतु भवान् । एतत्तत् तवावस्थानयोग्यं स्थलम् । तदेहि उपविशावः ।] (इत्युभावुपविशतः)

राजा—वयस्य, अद्य प्रत्यूषे श्रुतवेदपदजातज्ज्वरोऽहमतितरां खेद-ततिमावहामि । तत् केन मनोविनोदमाकरोमि ।

विदूषकः—भो वअस्स, वेदपदाकण्णणादो एव्वं दुम्मणाअंतो भवं जइ अहं जेव्व बह्मणो तुह अग्गदो भणिस्सं तदो किं दाव करिस्ससि । [भो वयस्य, वेदपदाकर्णनादेवैवं दुर्मनायते भवान् यद्यहमिव ब्राह्मणस्तवाग्रतो भणिष्ये तदा किं तावत् करिष्यसि ।]

राजा—पठ ।

विदूषकः—(पद्मासने स्थित्वा) विरंचि क्खु अहं प्पभूदो ता क्खणं झाणं कादुअ वेदपुलुसं पठिस्सं । [विरञ्चिः खल्वहं प्रभूस्तत् क्षणं ध्यानं कृत्वा वेदपुरुषं पठिष्यामि ।]

(इति ध्यानं नाटयति पुनः सविलक्षहस्तं पठति)

राजा—(साट्टहासम्) अहो तव वेदपठन कौशलम् । अनेन न मे कर्णज्वरः ।

विदूषकः—अहो णु ख्खु भोः, एसो ख्खु केलीसिलुच्चअवाहिणीवीचीणिअअवइअरपकडिदसीदलगुणो घणीभूदपूअताविंछपमुहरुख्खणिरुद्धमंदगमणो घणचंदणवणफ्फंससुरहि सुहअदि तुह समीवे समीरणो।
[अहो नु खलु भोः, एषः खलु केलिशिलोच्चयवाहिनीवीचिनिचयव्यतिकरप्रकटितशीतगुणो घनीभूतपूगतापिच्छप्रमुखवृक्षनिरुद्धमन्दगमनः घनचन्दनवनस्पर्शसुरभिः सुखयति तव समीपे समीरणः ।]

राजा—(पवनस्पर्शं सुखमभिनीय) वयस्य, पश्य पश्य ।

ईषत्प्रफुल्लदरमीलितयोः प्रभाते
वायुर्वहन् कमलकैरवयोः सुगन्धि ।
भूयो नयन् स्मृतिपथं ललनामुखाब्ज-
सौरभ्यमाशु मम तोषयतीह चेतः ॥ २० ॥

विदूषकः—वअस्स, एव्वं एव्वेदं । [वयस्य, एवमेवैतत्]

(प्रविश्य प्रतीहारः)

प्रतीहारः—जयतु जयतु महाराजः । महाराज, केचिज्जटिलानादाय स्त्रियं भवत्पुरुषनियन्त्रिता द्वारदेशमध्यासते ।

विदूषकः—महामदे, झत्ति प्पवेसअ । इत्थि आ चिट्ठदि ता जीविदह्मि । [महामते, झटिति प्रवेशय । स्त्री तिष्ठति तज्जीवितोऽस्मि ।]

राजा—वयस्य, योषिन्नामग्रहणादात्मन्यपि योषिद्व्यवहारमुरीकरोषि !

विदूषकः—ता झत्ति प्पवेसअ । [तज्झटिति प्रवेशय ।]

प्रतीहारः—यदाज्ञापयति भवान् तत्तथा । (इति निष्क्रान्तः)

(ततः प्रविशति वसन्तलतया सह जगद्वञ्चकमुखरमूढेश्वराः पुरुषाश्च)

राजपुरुषः—जयतु महाराजः । महाराज, एष दुरात्मा भुजङ्गो मूढेश्वरः इमौ चोभौ शिष्यावेतस्य जगद्वञ्चकमुखरौ । एताभ्याञ्चासौ गुरुर्मूढेश्वरो वसन्तलतया सह धृतः । (इति करेण वसन्तलतां दर्शयति)

राजा—वयस्य, पश्य पश्य—

एषा दोषारमणवदना मुग्धनीलोत्पलाक्षी
लक्ष्यीकृत्य क्षणमिह मम क्षोणिनाथस्य वक्षः।
क्षिप्रक्षामोदरपरिसराक्षोदशेषं कटाक्षै-
श्चक्रे क्षोण्यां क्षपितमदनाखर्वसौन्दर्यगर्वा ॥ २१ ॥

विदूषकः—ण लक्खीअदि तुह वक्खक्खोदो हिअअं जेव्व चिट्ठदि। ता किं मिच्छावग्गणं करेसि ! [न लक्ष्यते तव वक्षः क्षोदः हृदयमेव तिष्ठति। तत् किं मिथ्यावलगनं करोषि !]

राजा—(वसन्तलतावदनं विलोक्य विभाव्य च) भो वयस्य, पश्य।

सादृश्यं स्मरणस्य बोधकमिति स्पष्टं प्रजल्पन्ति ये
ते मूढा नितरां गिरामपि लसल्लीलावतीलाञ्छनाः।
नो चेन्मन्दसमीरसङ्गविचलत्पद्माच्छनेत्राननं
शीतांशुं कथमत्र निर्वृतिकरं विस्मारयत्याशु माम् ॥ २२ ॥

(सन्तापमभिनीय च) वयस्य, दुनोति मामियमुत्पलाक्षी। तत् सपद्येनामु···यामि।

(नेपथ्ये वैतालिकः)

भाविक्रमादिशतु महाराजायादिमा सन्ध्या। सम्प्रति हि—

भाण्डे कुण्डे मिहिरकिरणं वीक्ष्य सैरन्ध्रिकाऽसौ
स्वैरं स्वैरं सरसिजमुखी पादयो रञ्जनाय।
लाक्षाभ्रान्त्या नरप जगृहे पाणिपद्मेन पश्चात्
मत्वा मन्दं रविकर इति ह्री-नतास्या बभूव ॥ २३ ॥

मूढेश्वरः—(आकर्ण्य) एष मागधो वर्णयति भानुभानुप्रचारम्। (विलोक्य अञ्जलिं बद्ध्वा)

प्रवन्दारुलन्दारकालीकदेश-
स्खलन्मञ्जुमन्दारचञ्चत्पदाब्जम्।

नमामि त्रिलोकीकृतं साक्षिभूतं
तमिस्रातमस्तस्करं भास्करं तम् ॥ २४ ॥

(इति प्रणमति)

विदूषकः—(विलोक्य) अम्मो, किं उण एसो जवणो विअ संझं वंदेदि। ण उण एसो अह्माणं बह्मणाणं गोत्ते आआरो। ता अअं जवणो ज्जेब चिट्ठदि। जदो एदस्स सिसिणपेरंतप्पभूदबालस्सरिच्छो कुच्चो। (विभाव्य) अहो ण एसो जवणो जदो जडाओ चिट्ठंदि अहवा जवणो जडिलो भोदि। [अहो किम्पुनरेष यवन इव सन्ध्यां वन्दते। न पुनरेषोऽस्माकं ब्राह्मणानां गोत्रे आचारः। तदयं यवन एव तिष्ठति यत एतस्य शिश्नपर्यन्तप्रभूतबालसदृशः कूर्चः (विभाव्य) अहो न एष यवनः यतः जटाः तिष्ठन्ति। अथवा यवनो जटिलो भवति।]

राजा—वयस्य, यवनो जटिलोऽपि भवति !

विदूषकः—भोदि ज्जेव्व। [भवत्येव]

राजा—कथम् ?

विदूषकः—जहा तुरुक्को बह्मणो भोदि। [यथा तुरुष्को ब्राह्मणो भवति।] (सर्वे हसन्ति) भोः सअं णं एव्वं पुच्छामि। [भो सर्वं नन्वेकं पृच्छामि]

राजा—भवतु। (पुरुषं प्रति) पृच्छ तावत् त्वमेनम्।

पुरुषः—अले ले को उण दे देसो ? [अरे कः पुनस्तव देशः]

मूढेश्वरः—मध्यदेशः।

पुरुषः—किं उण दे गोत्तं ? [किम्पुनस्तव गोत्रम् ?]

मूढेश्वरः—मूढेश्वर इति।

पुरुषः—एदं दु जाणीहन। गोत्तं णु पुच्छामि।
[एतत्तु जानीमः। गोत्रं ननु पृच्छामि।]

मूढेश्वरः—हिमालयः मलयः सुमेरुः।

पुरुषः—सच्चं कहेलि ले किं वि किं वि मा जप्प अण्णहा लोह-कठिणेहिं अम्हाहं पादपोम्मेहिं खखोदीभूदो भइस्ससि । [सत्यं कथय रे किमपि किमपि मा जल्प अन्यथा लोहकठिनैरस्माकं पादपद्मैः क्षोदीभूतो भविष्यसि ।]

मूढेश्वरः—लोहकठिनान्यत एव पद्मानि । अहो वाग्मित्वम् ।

पुरुषः—झत्ति कहेहि । [झटिति कथय ।]

मूढेश्वरः—किमर्थम् ?

विदूषकः—तुह कण्णआए विवाहं कादुम् । [तव कन्यकायाः विवाहं कर्तुम्]

मूढेश्वरः—मत्कन्यां त्वं विवाहितुमर्हसि !

विदूषकः—अह्माणं सिट्ठत्तणं गोत्तं अ इंदिरादइओ वि वण्णिदुं ण पारेदि । को उण तुमं माणुसमक्कडो । रे रे माणुसमक्कडा पेक्ख पेक्ख । [अस्माकं शिष्टत्वं गोत्रञ्चेन्दिरादयितोऽपि वर्णितुं न पारयति । कः पुनस्त्वं मानुषमर्कटः । रे रे मानुषमर्कट, पश्य पश्य ।]

पुव्वं गदं हरघरम्मि मए अ तेण
पक्खालिदं गिरिसुदाकर-णीरजेहिं ।
जंघाजुअं अ परिकम्मिदमासणं मे
ता इच्छिआ करजप्फंसवणेण मुक्कं ॥ २५ ॥

[पूर्वं गतं हरगृहे मया च तेन
प्रक्षालितं गिरिसुताकरनीरजैः ।
जङ्घायुतञ्च परिकल्पितमासनं मे
तदिच्छिता करजस्पर्शनेन मुक्तम् ॥]

मूढेश्वरः—(विहस्यात्मगतम्) अहो दुरात्मनो वचनभङ्गीनागरता । तदेनं प्रत्येवम् (प्रकाशम्) कथं रे नवेच्छस्यस्मान् । पश्य—

अस्माकं नियमोऽस्ति दैवतसरित्कल्लोलकिर्मीरिते
स्थाने स्थेयमतो मुरारिभवनं याता वयं तत्र च ।

तां दृष्ट्वा चरणे शिवस्य सदनं याताश्चलज्जाह्नवी-
वीचीपुञ्जतरेण जातु सहसा तेनापि मूर्ध्ना धृताः ॥ २६ ॥

विदूषकः—(सहसोपसृत्य) एसो तुह्माणं बुड्ढाणं चलणेसु पदिदुं उवगदो। [एष युष्माकं वृद्धानां चरणेषु पतितुमुपगतः।] (इति तज्जटां धृत्वा तच्छिरो निजपादे स्थापयति)

राजा—(विहस्य) विपरीतं खल्वेतदभिवादनम्।

विदूषकः—अहीट्ठलाही होहि। [अभीष्टलाभी भव]

मूढेश्वरः—ऋषिभ्य आशीर्ग्रहणं योग्यम्।

विदूषकः—किं तुमं इसी त्ति णं जाणे। ख्खंत्तव्वो मह अवराहो। [किं त्वं ऋषिरिति ननु जाने। क्षन्तव्यो ममापराधः] (इति तस्य कर्णौ परिमोटयति। सर्वे हसन्ति।)

विदूषकः—तुमं इसी। एसा उण का? [त्वं ऋषिः। एषा पुनः का?]

मूढेश्वरः—अस्माकं सहधर्मचारिणी।

विदूषकः—तुम्हाणं को उण अस्समो? [युष्माकं कः पुनराश्रमः?]

मूढेश्वरः—गृहस्थाश्रमः।

विदूषकः—सो एसो ज्जेव्व। कहेहि ठ्ठाणं। [स एष एव। कथय स्थानम्।]

मूढेश्वरः—भगवतो निर्मेघाश्रमस्याश्रमे।

विदूषकः—एको णिम्मेहो तुमं जेव्व। [एको निर्मेघस्त्वमिव] (राजानं प्रति) महाराअ, उददं दे अदिहीणं पज्जुवासणं।

[महाराज, उचितं तेऽतिथीनां पर्युपासनम्।]

राजा—यथाह प्रियवयस्यः।

(इति मूढेश्वरं हस्ते गृहीत्वा सम्पूज्य मधुपर्काय समदं सौरभं सौरभमुपनयति)

मुढेश्वरः—(सहर्षं विलोक्य) युक्तमुक्तञ्च—'महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्' इति।

विदूषकः—सच्चं चिट्ठदि इसित्तणं एदस्सिं जदो रमणिज्जो उक्खो इक्खुव्व मडमडाइदो। अण्णं किं वि जाणासि उक्खअं मडमडितुं जेव्व। [सत्यं तिष्ठति ऋषित्वमेतस्मिन् यतः रमणीय उक्षो इक्षुरिव मडमडायितः। अन्यत् किमपि जानासि उत उक्षाणं मडमडायितुमेव।]

मूढेश्वरः—सर्वं जानामि यत् पृच्छसि। पश्य—

द्रुहिणगिरिशपद्माधीशलेखेशमुख्या-
नथ यदि त्रिदशान्ते वीक्षितुं कौतुकौघः।
हिमकिरणमिहस्थं धर्मराशिञ्च तूर्णं
मुनिगणमथ तुभ्यं दर्शयामि क्षणेन॥ २७॥

(प्राकृतमाश्रित्य) अवि अ मह कोदूहलम्मि-[अपि च मम कौतूहले-]
एदस्सि णइसोत्ते एरावणपहुदिणो दिसाईगआ।
मग्गा दाणि पुच्छसि चक्कोवंदा तुमं सलिलम्॥ २८॥
[एतस्मिन् नदीस्रोतसि ऐरावणप्रभृतयो दिशानां गजाः।
मग्ना इदानीं पृच्छसि चक्रोवांस्त्वं सलिलम्॥]

(आकाशे)

हा देव्व एआरिसी मज्झ विज्जाए परीक्खआ उप्पादिदा। भोदु।
[हा दैव, एतादृशी मम विद्यायाः परीक्षोत्पादिता। भवतु]

(प्रविश्य अपटीक्षेपेण निर्मेघाश्रमः)

निर्मेघाश्रमः—वत्स मूढेश्वर।

मूढेश्वरः—कथं भगवान् निर्मेघाश्रमः।

विदूषकः—(समभिसृत्य) दुवे वि णिम्मेहा मिलिदा ता ण उण उचिदं एदाणं णिम्मेहाणं सहाए अह्मारिसाणं छइल्लाणं उवविट्ठुं। [द्वावपि निर्मेघौ मिलितौ तन्नोचितमेतयोर्निर्मेघयोः सहायेऽस्मादृशानां यूनामुपवेष्टुम्।] (इति सरभसं गन्तुमिच्छति राजा बलादेनं स्थापयति।)

निमघाश्रमः—वत्स मूढेश्वर, किमिति त्वमस्मिन्नरपतिमौलितिलकद्वारभूषणमभवः।

मूढेश्वरः—भगवन् सर्वाद्भुतनिधे, एतस्या धर्मचारिण्या निमित्तमाभ्यामन्तेवासिभ्यामेतावद्दूरमुपढौकितोऽस्मि। इयञ्च मे धर्मनारीति भवन्त एव जानन्ति।

निर्मघाश्रमः—नारीति विघ्न एव। (स्वगतम्) इयं काचित् पुरनारी अमुनाऽऽहृतेति विभावयामश्चेतसि। तदेनं प्रत्येवम् (प्रकाशम्) (निपुणं विलोक्य) एषाऽस्माकं कनीयसा बुद्धिविरोधिना परिणीतपूर्वा कालिन्दीसोदरहरीति।

मूढेश्वरः—अश्रुतमिव।

(प्रविश्य प्रतीहारः)

प्रतीहारः—जयतु जयतु निखिलभूभृग्भट्टारकः। देव, मङ्गलकुठारमिश्रो द्वारदेशमलङ्करोति।

राजा—सपदि प्रवेशय।

प्रतीहारः—यदादिशति देवः। (इति निष्क्रान्तः)

(ततः प्रविशति मङ्गलकुठारमिश्रः।)

मङ्गलकुठारमिश्रः—शम्भोर्जटाजूटतटे निषण्णां
भागीरथीं सन्ततमाश्रयामः।
यस्याः कणस्पर्शवशान्नराणां
वृन्दारकत्वं सहसाऽभ्युपैति॥ २९॥

(विचिन्त्य) आदिष्टोऽस्मि तत्रभवता शुण्ठाचार्येण। यथा—'वत्स मङ्गलकुठार, अभिसरसि तावत् पम्पातीरपरिसरमेव तद् भगवतो भवानीवल्लभस्य पूजां निर्वर्तितुम्। तदभिसर तेनैव पथा राज्ञः पापाचारस्य सभायाम्। गत्वा च वयस्यो मूढेश्वरो (सह) वसन्तलतया मोच्यः।' इति। तदकृत्वा सपर्यां प्राप्तोऽस्मि राजभवनम्। यावदुपसरामि। (इति परिक्रामति)

निमग्ना—(सोपहाससम्भ्रमम्)

मृत्स्नामण्डितमुण्डपिण्डहृदया रुद्राक्षभस्माङ्किता-
स्ते दर्भाभंकमण्डितोद्भटकरा मिश्राः समायान्त्यमी ।
पम्पातीरतरङ्गरिङ्गणजुषः पिण्डाशया पीवरान्
मीनान् स्थाप्य च वंशपात्रपुटके वृन्दारकव्याजतः ॥ ३० ॥

मङ्गलकुठारमिश्रः—(उपसृत्य राजानं प्रति) महाराज,

वृद्धां कीर्तिलतां प्रतापदहनं ब्रह्माण्डभाण्डोदरे
किञ्च स्थापयता त्वया न विहितं साश्चर्यमेतज्जगत् ।
जीयाः पद्मभुवस्सहस्तमधिकं वर्षाणि वर्षन् भृशं
तर्षं किञ्च वनीपकस्य सततं धूम्नानि सङ्घर्षय ॥ ३१ ॥

(राजा प्रणम्य आसने उपवेशयति)

विदूषकः—दंसेहि दाव कोदूहलं । [दर्शय तावत्कौतूहलम् ।]

मुढेश्वरः—यदादिशति राजपुत्रः । नहि नहि राजपुरुषः ।

विदूषकः—(सक्रोधम्) आः दासीए पुत्ता, रण्णो सहाए असंबद्धं पलवेसि । [आः दास्यापुत्र, राज्ञः सहायेऽसम्बद्धं प्रलपसि]

(मूढेश्वरः ध्यानं नाटयति)

(प्रविश्य पुरुषः)

पुरुषः—हग्गे दंशेमि दाव एदाणं मुत्तीणं शलूवं रण्णोमहाळाए । एशे पोम्माशणे, एशे गिलिशे, एशे पोम्माधीशे, एशे अमलेशे (इति दर्शयति । पुनर्विलोक्य) अले अले जडिले के उण एशे तुए णिप्पादिदे । [अहो दर्शयामि तावदेतासां मूर्तीनां स्वरूपं राजेमहाराजाय । एष पद्मासनः, एष गिरीषः, एष पद्माधीशः, एष अमरेशः (इतिदर्शयति । पुनर्विलोक्य) अरे अरे जटिलाः के पुनरेते त्वया निष्पादिताः ।]

मूढेश्वरः—एते सप्तर्षयः ।

पुरुषः—एशे ते उण शत्तमुणिणि । [एते ते पुनः सप्त मुनयः]

मूढेश्वरः—अथ किम् ।

पुरुषः—एहग्ग केलिआए दाशीएउत्ता अक्खिणी मीलिअ कीश ठिठ्दे ? [अत्र कारिता दास्यापुत्राः अक्षिणी निमील्य कथं स्थिताः]

(इति लगुडं गृहीत्वा ताडयितुमिच्छति । मूढेश्वरः यष्टि भ्रामयित्वा निष्क्रामति)

विदूषकः—(विलोक्य) अहह !

गिलीशबह्मचंदओ महिंदविण्हुसुज्जओ ।
तिलोहिदा अ ईसिणो मुणीसलेण माणिणो ॥ ३२ ॥

[गिरीशब्रह्मचन्द्रकाः महेन्द्रविष्णुसूर्यकाः ।
तिरोहिताश्च ऋषयः मुनीश्वरेण मानिनः ॥]

मङ्गलकुमारमिश्रः—(वसन्तलतां निर्वर्ण्य). निष्क्रामन्तां नाम । किन्तेन । इयं भाति पुरतः ।

ब्रह्मेशमेशमुख्या देवाः यस्याः विलोचने वसन्ति ।
शितिलोहितकैतवतः स्पर्शसुखं सङ्गृहीतुमिव ॥ ३३ ॥

अपि च—

नासा सेतितरां पयोधरघटीनिष्पेषमालिङ्गनं
नो याचे न नमेति पूर्वकमथो मिष्टाक्षरं चुम्बनम् ।
अस्याश्चेच्चलतारकं मयि भवेन्नेत्रान्तसंवीक्षणं
कः काकः किल पाकशासन इति ख्यातो वराकस्तदा ॥ ३४ ॥

राजा—भगवन्, भवदायत्तैवेयं, तद्यनुगृह्यताम् ।

विदूषकः—ता गेण्हदु मिस्सो रण्णो अणुग्गहं । अज्ज तुह भाअधेअम्मि मोरा णच्चंदु । [तद् गृह्णातु मिश्रः राज्ञोऽनुग्रहम् । अद्य तव भागधेये मयूराः नृत्यन्तु ।]

जगद्भक्षकः—गृह्णन्तु मिश्राः ।

मुखरः—कप्पासेण दे सीसं खुण्डिदं । [कार्पासेन तव शीर्षं क्षुदितम्]

निर्मर्यादाश्रमः—मया निजप्रजावतीत्वं विधाय भवद्भ्यो दत्तेति ।

मूढेश्वरः—(स्वगतम्) सर्वेऽत्र परेष्टघातकाः मिलिताः । यद्भवतु तद्भवतु ।

मङ्गलकुठारमिश्रः—सत्यमुक्तं चतुरुदधिवेलावलयितेलावलया-

घिष्ठितकीर्तिस्तम्भेन महाराजेन। परन्तु शुण्ठाचार्यो दुर्मनस्को भविष्यति।

राजा—मद्भिद्या न शुण्ठाचार्यचित्ते व्यलीकशङ्कोदेष्यति।

मङ्गलकुठारमिश्रः—तथापि तच्चेतस्तादृशे कर्मणि प्रवर्तते।

राजा—सत्यनत्याख्यान···परिवर्तते शेमुषी विदुषाम्।

विदूषकः—(संस्कृतमाश्रित्य। सोपहासम्) भवन्त्येतादृश हि सङ्ख्या।

यतः—

अजानन्तः शास्त्रं श्रुतिषु नितरां मूढमतयो
न जाताः कामारेः पदयुगलपाथोजरसिकाः।
प्रगल्भन्ते नित्यं करयुगशिरःकम्पनविधौ
नरास्ते विद्वांसः शिवशिव कलेरेष महिमा॥ ३५॥

(सर्वे उपहसन्ति)

मङ्गलकुमारमिश्रः—(राजानं प्रति) महाराज, यथाह शुण्ठाचार्यवयस्यस्तदस्मै प्रतीच्छतामियम्।

राजा—यदभिरोचते भवते। (इति वसन्तलतां मूढेश्वराय प्रतिपादयति)

मङ्गलकुमारमिश्रः—मूढेश्वर, किन्ते भूयः प्रियमुपकरोमि।

मूढेश्वरः—वयस्य, इतः परमपि प्रियमस्ति। तथापीदमस्तु

(भरतवाक्यम्)

एते पचेलिमसुधा मधुराधरायां
वाचाविलासविसराः विदुषां भवन्तु।
पाथोधराश्च धरणीं जलधोरणीभिः
सिञ्चन्तु भूमिपतयो वसुधामवन्तु॥ ३६॥

(इति निष्क्रान्ताः सर्वे।)

इति द्वितीयः सन्धिः।

॥ इति नरहरिदीक्षितसुनुसूरिदीक्षितसामराजविरचितं
धूर्तनर्तकं नाम प्रहसनं समाप्तिमगमत्॥

—:**:—

धूर्तनर्तकप्रहसन-पद्यानुक्रमणिका